# Dharmavyadhakritam Purushottamaparam Stotram

# ધર્મવ્યાધકૃતં પુરુષોત્તમપરં સ્તોત્રમ્

## Document Information

Text title : Dharmavyadhakritam Purushottamaparam Stotram

File name : dharmavyAdhakRRitaMpuruShottamaparaMstotram.itx

Category : vishhnu, vishnu, stotra, varAhapurANa

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : varAhapurANa | adhyAya 8/42-48||

Latest update : September 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2024

*sanskritdocuments.org*

# ધર્મવ્યાધકૃતં પુરુષોત્તમપરં સ્તોત્રમ્

(ધર્મવ્યાધ ઉવાચ)  - (ઠિસ્ ઇસ્ નોત્ ગિવેન્ ઇન્ થે બૂક્)
નમામિ વિષ્ણું ત્રિદશારિનાશનં વિશાલવક્ષસ્થલસંશ્રિતશ્રિયમ્ ।
સુશાસનં નીતિમતાં પરાં ગતિં ત્રિવિક્રમં મન્દરધારિણં સદા ॥ ૪૨॥

દામોદરં રઞ્જિતભૂતલં ધિયા યશોંશુશુભ્રં ભ્રમરાઙ્ગસપ્રભમ્ ।
ધરાધરં નરકરિપું પુરુષ્ટુતં નમામિ વિષ્ણું શરણં જનાર્દનમ્ ॥ ૪૩॥

(નરં નૃસિંહં હરિમીશ્વરં પ્રભું ત્રિધામનામાનમનન્તવર્ચસમ્ ।
સુસંસ્કૃતાસ્યં શરણં નરોત્તમં વ્રજામિ દેવં સતતં તમચ્યુતમ્ ॥) ૮.૪૩ (૧)
(This verse is not in Chowkhamba version. Included from some other version)
ત્રિધા સ્થિતં તિગ્મરથાઙ્ગપાણિનં નયસ્થિતં તૃપ્તમનુત્તમૈર્ગુણૈઃ ।
નિઃશ્રેયસાખ્યં ક્ષપિતેતરં ગુરું નમામિ વિષ્ણું પુરુષોત્તમં ત્વહમ્ ॥ ૪૪॥

(હતૌ પુરાણૌ મધુકૈટભાવુભૌ બિભર્ત્તિ ચ ક્ષ્માં શિરસા સદા હિ સઃ ।
યથા સ્તુતો મે પ્રસભં સનાતનો દધાતુ વિષ્ણુઃ સુખમૂર્જિતં મમ ॥) ૮.૪૪ (૧)
(Same as in 43)
મહાવરાહો હવિષામ્બુભોજનો જનાર્દનો મે હિતકૃચ્ચતુર્મુખઃ ।
ક્ષિતીધરો મામુદધિક્ષયો મહાન્ સ પાતુ વિષ્ણુઃ શરણાર્થિનં તુ મામ્ ॥ ૪૫॥

માયાતતં યેન જગત્ત્રયં કૃતં યથાગ્નિનૈકેન તતં ચરાચરમ્ ।
ચરાચરસ્ય સ્વયમેવ સર્વતઃ સ મેઽસ્તુ વિષ્ણુઃ શરણં જગત્પતિઃ ॥ ૪૬॥

ભવે ભવે યશ્ચ સસર્જ્જ કં તતો જગત્પ્રસૂતં સચરાચરં ત્વિદમ્ ।
તતશ્ચ રુદ્રાત્મવતિ પ્રલીયતે તતો હરિર્વિષ્ણુહરસ્તથોચ્યતે ॥ ૪૭॥

ખાત્મેન્દુપૃથ્વીપવનાગ્નિભાસ્કરા જલં ચ યસ્ય પ્રભવન્તિ મૂર્ત્તયઃ ।
સ સર્વદા મે ભગવાન્ સનાતનો દદાતુ શં વિષ્ણુરચિન્ત્યરૂપધૃક્ ॥ ૪૮॥

ઇતીરિતે તસ્ય સનાતનઃ સ્વયં પુરો બભૂવાદ્ભુતરૂપદર્શનઃ ।

ઇતિ વરાહપુરાણે અષ્ટાધ્યાયાન્તર્ગતં ધર્મવ્યાધકૃતં

પુરુષોત્તમપરં સ્તોત્રં સમાપ્તમ્ ।

વરાહપુરાણ । અધ્યાય ૮/૪૨-૪૮ ॥

varAhapurANa . adhyAya 8/42-48..

Proofread by PSA Easwaran

*Dharmavyadhakritam Purushottamaparam Stotram*

pdf was typeset on September 4, 2024

Please send corrections to *sanskrit@cheerful.com*